
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 01/03/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 01/03/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | | **Ist Proof Reading & Correction** | **M S Venugopal & H K Srinivasa Rao** |
| 4 | | **2nd Proof Reading & Correction** | **M S Venugopal** |
| 5 | 28/08/2013 | **Published** | **H K Srinivasa Rao** |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: SRKARC6070*

*Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ"

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

# ॥ उपाधिखण्डनम् ॥

नारायणोऽगण्यगुणनित्यैकनिलयाकृतिः ।

अशेषदोषरहितः प्रीयतां कमलालयः ॥ 01 ॥

अज्ञाताऽखिलसंवेत्तुर्घटते न कुतश्चन ।

उपाधिभेदाद्धटत इति चेत् स स्वभावतः ॥ 02 ॥

अज्ञानतो वा द्वैतस्य सत्यता स्वत एव चेत् ।

अनवस्थितिरज्ञानहेतौ वाऽन्योन्यसिद्धिता ॥ 03 ॥

चक्रकापत्तिरथवा भेदश्चोपाधितः कुतः ।

विद्यमानस्य भेदस्य ज्ञापको नैव कारकः ॥ 04 ॥

उपाधिर्दृष्टपूर्वो हि खेऽपि देशान्तरस्य सः ।

ज्ञापको विद्यमानस्य मूढबुद्धिव्यपेक्षया ॥ 05 ॥

न चेदुपाधिसम्बन्ध एकदेशेऽथ सर्वगः ।

एकदेशेऽनवस्था स्यात् सर्वगश्चेन्न भेदकः ॥ 06 ॥

सुखदुःखादिभोगश्च स्वरूपैक्ये न भेदकः ।

दृष्योर्ह्युपाधिभेदेऽपि हस्तपादादिगो यथा ॥ 07 ॥

नानादेहगभोगानुसन्धानं योगिनो यथा ।
न चेद्भोगानुसन्धानं तदिच्छा योगिनः कुतः ॥ 08 ॥

अनुसन्धानरहितदेहबाहुल्यमन्यथा ।
सिद्धमेव हि तत्पक्षे विशेषो योगिनः कुतः ॥। 09 ॥

सिद्धौ हि कर्मभेदस्य स्यादुपाधिविभिन्नता ।
तत्सिद्धौ चैव तत्सिद्धिरित्यन्योन्यव्यपाश्रयः ॥ 10 ॥

आत्मस्वभाव भेदस्य विदोषत्वेन चाखिलः ।
प्रत्यक्षादिविरोधाच्च दुष्टः पक्षोऽयमञ्जसा ॥ 11 ॥

चेष्टालिङ्गेन सात्मत्वे परदेहस्य साधिते ।
अन्यत्वं स्वात्मनस्तस्मात् सर्वैरेवानुभूयते ॥ 12 ॥

अज्ञाता चाल्पशक्तित्वं दुःखित्वं स्वल्पकर्तृता ।
सर्वज्ञतादीशगुणविरुद्धा ह्यनुभूतिगाः ॥ 13 ॥

सार्वज्ञादिगुणा विष्णोः श्रुतिषु प्रतिपादिताः ।
सत्यः सो अस्य महिमेत्यादिवाक्यान्मृषा न च ॥ 14 ॥

न च वेदोक्तमिथ्यात्वे मानं तन्मानताऽपि न ।
अतोऽज्ञानसम्भवादेव नाधिकार्यैक्यवादिनाम् ॥ 15 ॥

अतो नाज्ञातमिति च विषयो विषयान्तरे ।

अज्ञाभावात् फलं कस्य योगः शशनृश्रृङ्गयोः ॥ 16 ॥

दुर्घटत्वं भूषणं चेत् स्याद्विद्यात्वमात्मनः ।

अन्धन्तमोऽप्यलङ्कारो नित्यदुःखं शिरोमणिः ॥ 17 ॥

अतः परो मात्र येति पूर्वश्रुतिनिदर्शितः ।

अन्यमीशमिति श्रुत्या भिन्नजीवदृशं गतः ।

भिन्नत्वेनात्मसादृश्यदो यदेति श्रुतेः सदा ॥ 18 ॥

मायावादतमोव्याप्तमिति तत्त्वदृशा जगत् ।

भातं सर्वज्ञसूर्येण प्रीतये श्रीपतेः सदा ॥ 19 ॥

नमोऽमन्दनिजानन्दसान्द्रसुन्दरमूर्तये ।

इन्दिरापतये नित्यानन्दभोजनदायिने ॥ 20 ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादायार्य विरचितं उपाधिखण्डनम् ॥

॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥

॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥